॥ अथभ्रमरगीतप्रारंभः ॥

श्रीगणेशाय नमः ॥ ॥ गोप्यऊचुः ॥ मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः ॥ वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् ॥ १ ॥ सकृदधरसुधां स्वां मोहिनीं पाययित्वा सुमनसइव सद्यस्तत्यजे ऽस्मान् भवादृक् ॥ परिचरति कथं तत्पादपद्मं तु पद्मा ह्यपिबत हृतचेताउत्तमश्लोकजल्पैः ॥ २ ॥ किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतोनः पुराणम् ॥ विजयसख सखीनां गीयतांतत्प्रसंगः क्षपितकुचरुजस्ते

कल्पयंतीष्टमिष्टाः ॥ ३॥दिवि भुवि च रसा-
यां काः स्त्रियस्तद्दुरापाः कपटरुचिरहास-
भ्रूविजृंभस्य याः स्युः ॥ चरणरजउपास्ते
यस्य भूतिर्वयं का अपिच कृपणपक्षे ह्यु-
त्तमश्लोकशब्दः ॥४॥ विसृज शिरसि पादं
वेद्म्यहं चाटुकारैरनुनयविदुषस्ते ऽभ्येत्य
दौत्यैर्मुकुंदात् ॥ स्वकृतइह विसृष्टापत्यप-
त्यन्यलोकाव्यसृजदकृतचेताः किंनु संधे-
यमस्मिन् ॥ ५ ॥ मृगयुरिव कपींद्रं विव्यधे
लुब्धधर्मा स्त्रियमकृत विरूपां स्त्रीजितः
कामयानाम् ॥ बलिमपि बलिमत्त्वा वेष्टयद्
ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्त-
त्कथाऽर्थः ॥६॥ यदनुचरितलीलाकर्णपीयू-
षविप्रुट्सकृददनविधूतद्वंद्वधर्माविनष्टाः ॥

सपदि गृहकुटुंबं दीनमुत्सृज्यदीना बह-
वइह विहंगाभिक्षुचर्यां चरंति ॥ ७॥ वय-
मृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिक-
रुतमिवाज्ञाः कृष्णवध्वोहरिण्यः ॥ दृष्ट्वा सु-
सृक्देतत्तन्नखस्पर्शतीव्रस्मररुजउपमंत्रिन्
भणतामन्यवार्ता ॥ ८॥ प्रियसख पुनरागाः
प्रेयसा प्रेषितः किं वरय किमनुरुंधे मान-
नीयोऽसि मेंऽग ॥ नयसि कथमिहास्मान्
दुस्त्यजद्वंद्वपार्श्वं सततमुरसि सौम्य श्रीर्व-
धूः साकमास्ते ॥ ९ ॥ अपिबत मधुपुर्यामा-
र्यपुत्रोऽधुनास्ते स्मरति सपितृगेहान्सौ-
म्य बंधूंश्च गोपान् ॥ क्वचिदपि सकथानः
किंकरीणांगृणीते भुजमगरुसुगंधं मूर्ध्नि
धास्यत्कदानु ॥ १० ॥ ॥ श्रीशुकउवाच ॥

अथोद्धवोनिशम्यैवं कृष्णदर्शनलालसः ॥ सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत ॥ ११ ॥ ॥ उद्धवउवाच ॥ ॥अहो यूयं स्म पूर्णार्था भवत्योलोकपूजिताः ॥ वासुदेवे भगवति या सामित्यर्पितं मनः।१२।दानव्रततपोहोमजपस्वाध्यायसंयमैः ॥ श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते ॥ १३॥ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा ॥ भक्तिःप्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा। १४।दिष्ट्यापुत्रान्पतीन्देहान् स्वजनान् भवनानिच ॥ हित्वा ऽवृणीत यूयं यत्कृष्णाख्यं परमं परम् ॥१५॥सर्वात्मभावोऽधिकृतोभवतीनामधोऽक्षजे ॥ विरहेण महाभागामहान्मेनुग्रहःकृतः॥१६॥श्रूयतां प्रियसंदेशोभवतीनांसुखा-

वहः ॥ यमादायागतोभद्राअहं भर्तूरहस्क-
रः ॥ १७ ॥ ॥ इतिश्रीमद्भागवते महापु-
राणे दशमस्कंधे भ्रमरगीतं समाप्तम् ॥
॥ ७ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ७ ॥

॥ अथ श्रुतिगीतप्रारंभः ॥

श्रीगणेशाय नमः ॥ श्रुतयऊचुः ॥ ॥
जय जय जह्यजामजितदोषगृभीतगुणां
त्वमसि यदात्मना समवरुद्धसमस्तभगः ॥
अगजगदोकसामखिलशक्त्यवबोधक ते
क्वचिदजयात्मना च चरतोऽनुचरेन्निगमः ॥
॥ १ ॥ बृहदुपलब्धमेतदवयंत्यवशेषतया य-
तउदयास्तमयौ विकृतेर्मृदि वा विकृतात् ॥
अतऋषयोदधुस्त्वयि मनोवचनाचरितं क-
थमयथा भवंति भुवि दत्तपदानि नृणाम् ॥

२ ॥ इति तव सूरयस्त्र्यधिपते ऽखिललोक-
मलक्षपणकथामृताब्धिमवगाह्य तपांसि ज-
हुः ॥ किमुत पुनः स्वधामविधुताशयकाल-
गुणाः परम भजंति ये पदमजस्रसुखानु-
भवम् ॥३॥ दृतयइव श्वसंत्यसुभृतोयदि ते
ऽनुविधामहदहमादयोंडमसृजन्यदनुग्रह-
तः॥ पुरुषविधोन्वयोत्र चरमोन्नमयादिषु
यः सदसतः परं त्वमथ यदेष्ववशेषमृतम्
॥ ४ ॥ उदरमुपासते यऋषिवर्त्मसु कूर्प-
दृशः परिसरपद्धतिं हृदयमारुणयोदहरम्
॥ततउदगादनंत तव धाम शिरः परमं पुन-
रिह यत्समेत्यन पतंति कृतांतमुखे ॥ ५ ॥
स्वकृतविचित्रयोनिषु विशन्निव हेतुतयात
रतमतश्वकास्त्यनलवत्स्वकृतानुकृतिः ॥

अथ वितथास्वमूष्ववितथं तव धाम समं विरजधियोन्वयंत्यभिविपण्यवएकरसम् ॥ ॥ ६॥स्वकृतपुरेष्वमीष्ववहिरंतरसंवरणं तव पुरुषं वदंत्यखिलशक्तिधृतोंऽशकृतम् ॥इति नृगतिं विविच्य कवयोनिगमावपनं भवत-उपासतेंऽघ्रिमभवं भुवि विश्वसिताः ॥ ७ ॥ दुरवगमात्मतत्त्वनिगमाय तवात्ततनोश्व-रितमहामृताब्धिपरिवर्तपरिश्रमणाः ॥ न परिलषंति केचिदपवर्गमपीश्वर ते चरण-सरोजहंसकुलसंगविसृष्टगृहाः ॥ ८॥ त्वद-नुपथं कुलायमिदमात्मसुहृत्प्रियवच्चरति तथोन्मुखे त्वयि हिते प्रियआत्मनि च ॥ न बत रमंत्यहो असदुपासनयात्महनोयदनु शयाभ्रमंत्युरुभये कुशरीरभृतः ॥ ९ ॥ निभृ-

तमरुन्मनोक्षदृढयोगयुजो हृदि यन्मुनय उपासते तदरयोपि ययुः स्मरणात्॥ स्त्रिय उरगेंद्रभोगभुजदंडविषक्तधियो वयमपि ते समाः समदृशांघ्रिसरोजसुधाः ॥१०॥ क इह नु वेद बताऽवरजन्मलयोग्रसरं यतउदगादृषिर्यमनुदेवगणा उभये ॥ तर्हि न सन्नचासदुभयं नच कालजवः किमपि न तत्र शास्त्रमवकृष्य शयीत यदा॥११॥जनिमसतः सतोमृतिमुतात्मनि येच भिदां विपणमृतं स्मरंत्युपदिशंति त आरुपितैः ॥ त्रिगुणमयः पुमानिति भिदा यदबोधकृता त्वयि न ततः परत्र स भवेदवबोधरसे ॥१२ ॥ सदिवमनस्त्रिवृत्त्वयि विभात्यसदामनुजात्सदभिमृशंत्यशेषमिदमात्मतयात्मविदः॥नहि

विकृतिं त्यजंति कनकस्य तदात्मतयास्वकृ-
तमनुप्रविष्टमिदमात्मतयावसितम् ॥१३॥
तव पारि ये चरंत्यखिलसत्वनिकेततया उत-
त पदाक्रमंत्यविगणय्य शिरोनिर्ऋतेः ॥ प-
रिवयसे पशूनिव गिरा विबुधानपि तांस्त्व-
यि कृतसौहृदाः खलु पतंति न ये विमुखाः
॥१४॥ त्वमकरणः स्वराडखिलकारकशक्ति
धरस्तवबलिमुद्वहंति समदंत्यजयानिमिषाः
वर्षभुजोऽखिलक्षितिपतेरिव विश्वसृजो वि-
दधति यत्र ये त्वधिकृता भवतश्चकिताः ॥
१५॥स्थिरचरजातयः स्युरजयोत्थनिमित्त
युजोविहरउदीक्षया यदि परस्य विमुक्तत
तः ॥ नहि परमस्य कश्चिदपरो न परश्च
भवेद्वियतइवापदस्य तव शून्यतुलां दध-

तः ॥ १६ ॥ अपरिमिताध्रुवास्तनुभृतोयदि सर्वगतास्तर्हि न शास्यतेति नियमोध्रुव नेतरथा ॥ अजनि च यन्मयं तदविमुच्य नि यंतृ भवेत्सममनुजानतां यदमतं मतदुष्ट-तया ॥ १७ ॥ न घटत उद्भवः प्रकृतिपूरुषयो-रजयोरुभययुजा भवंत्यसुभृतोजलबुद्बुद-वत् ॥ त्वयि तइमे ततो विविधनामगुणैः परमे सरितइवार्णवे मधुनि निलिल्युरशेषरसाः ॥ १८ ॥ नृषु तव मायया भ्रममयीष्ववगत्यभृ शं त्वयि सुधियोभवे दधति भावमनुप्रभ-वम् ॥ कथमनुवर्ततां भवभयं तव यद्भ्रुकु-टिः सृजति मुहुस्त्रिणेमिरभवच्छरणेषु भ-यम् ॥ १९ ॥ विजितहृषीकवायुभिरदांतमन स्तुरगं य इह यतंति यंतुमतिलोलमुपाय-

खिदः ॥ व्यसनशतान्विताः समवहाम गुरो-
श्चरणं वणिजइवाज संत्यकृतकर्णधराजल-
धौ ॥२०॥स्वजनसुतात्मदारधनधामधरासु
रथैस्त्वयि सति किं नृणां श्रयत आत्मनि स-
र्वरसे ॥ इति सदजानतां मिथुनतोरतये च-
रतां सुखयति कोन्विह स्वविहते स्वनिरस्त
भगे॥२१॥भुवि पुरुपुण्यतीर्थसदनान्यृषयो-
विमदास्तउतभवत्पदांबुजहृदो ऽघभिदंघ्रि-
जलाः ॥ दधति सकृन्मनस्त्वयि य आत्मनि
नित्यसुखे न पुनरुपासते पुरुषसारहराव-
सथान् ॥२२॥ सतइदमुत्थितं सदिति चेन्न-
नु तर्कहतं व्यभिचरति क्व च क्व च मृषा नत-
थोभययुक् ॥ व्यवहृतये विकल्पइषितोंधप-
रंपरया भ्रमयति भारती तउरुवृत्तिभिरु-

क्थजडान् ॥ २३ ॥ नयदिदमग्रआस न भविष्यतोनिधनादनुमितमंतरा त्वयि विभाति मृषैकरसे ॥ अतउपमीयते द्रविणजातिविकल्पपथैर्वितथमनोविलासमृतामित्यवयंत्यबुधाः ॥२४॥ सयदजया त्वजामनुशयीत गुणांश्च जुषन् भजति सरूपतां तदनु मृत्युमपेतभगः ॥ त्वमुत जहासि तामहिरिव त्वचमात्तभगोमहसि महीयसे ऽष्टगुणितेऽपरिमेयभगः॥२५॥यदि न समुद्वरंति यतयोहृदि कामजटादुरधिगमोसतां हृदि गतोऽस्मृतकंठमणिः ॥ असुतृपयोगिनामुभयतोऽप्यसुखंभगवन्ननपगतांतकादनधिरूढपदाद्भवतः ॥ २६ ॥ त्वदवगमी न वेत्ति भवदुत्थशुभाशुभयोर्गुणविगुणन्वियांस्तार्हि-

देहभृतां च गिरः ॥ अनुयुगमन्वहं सगुण-
गीतपरंपरया श्रवणभृतोयतस्त्वमपवर्गग
तिर्मनुजैः ॥२७॥ द्युपतयएव ते न ययुरंत-
मनंततया त्वमपि यदंतरांडनिचया ननु सा-
वरणाः ॥ खइव रजांसि वांति वयसा सह य-
च्छ्रुतयस्त्वयि हि फलंत्यतन्निरसनेन भव-
न्निधनाः ॥ २८ ॥ ॥श्रीभगवानुवाच॥ ॥
इत्येतद्ब्रह्मणःपुत्राआश्रुत्यात्मानुशासनम् ॥
सनंदनमथानर्चुः सिद्धाज्ञात्वात्मनोगतिम् ॥
॥२९॥ इत्यशेषसमाम्नायपुराणोपनिषद्रसः
॥ समुद्धृतः पूर्वजातैर्व्योमयानैर्महात्मभिः॥
३० ॥ त्वंचैतद्ब्रह्मदायाद श्रद्धयात्मानुशास-
नम् ॥ धारयंश्चर गां कामं कामानां भर्जनं
नृणाम् ॥ ३१ ॥ ॥श्रीशुकउवाच॥ ॥ ए-

वं स ऋषिणादिष्टं गृहीत्वा श्रद्धयात्मवान् ॥ पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः ॥ ३२ ॥ नारदउवाच॥ ॥नमस्तस्मै भगवते कृष्णायामलकीर्तये ॥ योधत्ते सर्वभूतानामभवायेशतीः कलाः ॥ ३३॥ इत्याद्यमृषिमानम्य तच्छिष्यांश्च महात्मनः ॥ ततोगादाश्रमं साक्षात्पितुर्द्वैपायनस्य मे ॥ ३४ ॥ सभाजितो भगवता कृतासनपरिग्रहः ॥ तस्मै तद्वर्णयामास नारायणमुखाच्छ्रुतम् ॥ ३५ ॥ इत्येतद्वर्णितं राजन् यन्नः प्रश्नः कृतस्त्वया ॥ यथा ब्रह्मण्यनिर्देश्ये निर्गुणेपि श्रुतिश्चरेत् ॥ ३६॥ योस्योत्प्रेक्षकआदिमध्यनिधने योव्यक्तजीवेश्वरो यः सृष्ट्वेदमनुप्रविश्य ऋषिणा चक्रे परः शास्ति ताः ॥ यं

संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथा तं कैवल्यनिरस्तयोनिमभयं ध्याये-दजस्रं हरिम् ॥ ३७ ॥ ॥इतिश्रीमद्भाग-वते महापुराणे दशमस्कंधोत्तरार्द्धे श्रुति-गीतं समाप्तम् ॥ ॥श्रीकृष्णार्पणमस्तु ॥

॥ अथअवधूतगीतप्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अवधूतद्विजं कं-चिच्चरंतमकुतोभयम् ॥ कविं निरीक्ष्य तरु-णं यदुः पप्रच्छ धर्मवित् ॥ १ ॥ यदुरुवा-च ॥ कुतोबुद्धिरियं ब्रह्मन्नकर्तुः सुवि-शारदा ॥ यामासाद्य भवाँल्लोकं विद्वांश्च-रति बालवत् ॥२॥ प्रायोधर्मार्थकामेषु वि-वित्सायां च मानवाः ॥ हेतुनैव समीहंते आयुषो यशसः श्रियः ॥ ३ ॥ त्वं तु कल्पः

कविर्दक्षः सुभगोमृतभाषणः ॥ न कर्ता नेहसे किंचिज्जडोन्मत्तपिशाचवत् ॥ ४ ॥ जनेषु दह्यमानेषु कामलोभदवाग्निना ॥ न तप्यसेऽग्निना मुक्तो गंगांभस्थइव द्विपः॥५॥ त्वं हि नः पृच्छतां ब्रह्मन्नात्मन्यानंदकारणम्॥ब्रूहि स्पर्शविहीनस्य भवतः केवलात्मनः ॥६॥ ॥श्रीभगवानुवाच ॥ यदुनैवं महाभागो ब्रह्मण्येन स्वमेधसा ॥ पृष्टः सभाजितः प्राह प्रश्रयावनतं नृपम् ॥७॥ ॥ब्राह्मणउवाच॥ ॥संति मे गुरवो राजन् बहवोबुद्ध्युपाश्रिताः ॥ यतोबुद्धमुपादाय मुक्तोटामीह तान् शृणु ॥ ८ ॥ पृथिवी वायुराकाशमापोग्निश्चंद्रमा रविः ॥ कपोतो ऽजगरः सिंधुः पतंगोमधुकृद्गजः ॥ ॥ ९ ॥ मधुहा हरिणो मीनः पिंगला कुररोऽ

र्भकः ॥ कुमारी शरकृत्सर्पऊर्णनाभिः सुपेश-
कृत ॥१०॥एते मे गुरवोत् राजन् चतुर्विंश-
तिराश्रिताः ॥ शिक्षावृत्तिभिरेतेषामन्वशिक्ष-
मिहात्मनः ॥११॥ यतोयदनुशिक्षामि यथा
वा नाहुषात्मज ॥ तत्तथा पुरुषव्याघ्र निबो-
ध कथयामि ते ॥१२॥ भूतैराक्रम्यमाणोपि
धीरोदैववशानुगैः ॥ तद्विद्वान्नचलेन्मार्गा-
दन्वशिक्षं क्षितेर्व्रतम् ॥१३॥ शश्वत्परार्थ-
सर्वेहः परार्थैकांतसंभवः ॥ साधुः शिक्षे-
त भूभृत्तो नगशिष्यः परात्मताम् ॥ १४ ॥
प्राणवृत्त्यैव संतुष्येन्मुनिर्नैवेंद्रियप्रियैः ॥
ज्ञानं यथा न नश्येत नावकीर्येत वाङ्मनः
॥१५॥विषयेष्वाविशन्योगी नानाधर्मेषु स-
र्वतः ॥ गुणदोषव्यपेतात्मा न विषज्जेत

वायुवत् ॥१६॥ पार्थिवेष्विह देहेषु प्रविष्ट-
स्तद्गुणाश्रयः ॥ गुणैर्न युज्यते योगी गंधै-
र्वायुरिवात्मदृक् ॥ १७ ॥ अंतर्हितश्च स्थि-
रजंगमेषु ब्रह्मात्मभावेन समन्वयेन ॥ व्या-
ख्या व्यवच्छेदमसंगमात्मनोमुनिर्नभस्त्वं
विततस्य भावयेत् ॥१८॥ तेजोबन्नमयैर्भा-
वैर्मेघाद्यैर्वायुनेरितैः ॥ न स्पृश्यते नभस्त-
द्वत्कालसृष्टैर्गुणैः पुमान् ॥१९॥ स्वच्छः प्र-
कृतितः स्निग्धोमाधुर्यस्तीर्थभूर्नृणाम् ॥ मु-
निः पुनात्यपां मित्रमीक्षोपस्पर्शकीर्तनैः ॥
२०॥तेजस्वी तपसा दीप्तोदुर्धर्षोदरभाजनः
॥ सर्वभक्षोपि युक्तात्मा नादत्ते मलमग्निव-
त् ॥२१॥ क्वचिच्छन्नः क्वचित्स्पष्टउदास्यः
श्रेयइच्छताम् ॥ भुंक्ते सर्वत्रदातृणां दहन्-

प्रागुत्तराशुभम् ॥२२॥ स्वमायया सृष्टामिदं सदसल्लक्षणं विभुः ॥ प्रविष्टईयते तत्तत्सरूपोग्निरिवैधसि ॥२३॥ विसर्गाद्याः श्मशानांताभावादेहस्य नात्मनः ॥ कलानामिव चंद्रस्य कालेनाव्यक्तवर्त्मना॥२४॥कालेन ह्योघवेगेन भूतानां प्रभवाप्ययौ ॥ नित्यावपि न दृश्येते आत्मनोग्नेर्यथार्चिषाम् ॥२५॥ गुणैर्गुणानुपादत्ते यथाकालं विमुंचति ॥ न तेषु युज्यते योगी गोभिर्गाइव गोपतिः ॥२६॥बुध्यते स्वेन भेदेन व्यक्तिस्थइव तद्गतः ॥ लक्ष्यते स्थूलमतिभिरात्मा चावस्थितोर्कवत् ॥२७॥ नातिस्नेहः प्रसंगो वा कर्तव्यः क्वापि केनचित्॥कुर्वन्विंदेत संतापं कपोतइव दीनधीः॥२८॥ कपोतः कश्चनारण्ये कृतनीडो

वनस्पतौ ॥ कपोत्या भार्यया सार्धमुवास कतिचित्समाः॥२९॥कपोतौ स्नेहगुणितहृदयौ गृहधर्मिणौ ॥ दृष्टिं दृष्टचांगमंगेन बुद्धिं बुद्धचा बबंधतुः।३०।शय्यासनाटनस्थानवार्ताक्रीडाशनादिकम् ॥ मिथुनीभूय विस्रब्धौ चेरतुर्वनराजिषु॥३१॥यं यं वांछति साराजं स्तर्पयंत्यनुकंपिता॥ तं तं समनयत्कामं कृच्छ्रेणान्याजितेंद्रियः।३२।कपोती प्रथमं गर्भं गृह्णती कालआगते ॥ अंडानि सुषुवे नीडे स्वपत्युः सन्निधौ सती॥३३॥तेषु काले व्यजायंत रचितावयवाहरेः ॥ शक्तिभिर्दुर्विभाव्याभिः कोमलांगतनूरुहाः ॥३४॥ प्रजाःपुपुषतुः प्रीतौ दंपती पुत्रवत्सलौ ॥ शृण्वंतौ कूजितं तासां निर्वृतौ कलभाषितैः ॥३५॥

तासां पतत्रैः सुस्पर्शैः कूजितैर्मुग्धचेष्टितैः ॥ प्रत्युद्गमैरदीनानां पितरौ मुदमापतुः ॥ ३६॥ स्नेहानुबद्धहृदयावन्योन्यं विष्णुमायया ॥ विमोहितौ दीनधियौ शिशून्पुपुषतुः प्रजाः ॥३७॥ एकदा जग्मतुस्तासामन्नार्थौ तौ कुटुंबिनौ ॥ परितः कानने तस्मिन्नर्थिनौ चेरतुश्चिरम् ॥ ३८ ॥ दृष्ट्वा ताँल्लुब्धकः कश्चिद्यदृच्छातोवनेचरः ॥ जगृहे जालमावृत्य चरतः स्वालयांतिके ३९ ॥ कपोतश्च कपोती च प्रजापोषे सदोत्सुकौ ॥ गतौ पोषणमादाय स्वनीडमुपजग्मतुः ॥४०॥ कपोती स्वात्मजान्वीक्ष्य बालकाञ्जालसंवृतान् ॥ तानभ्यधावत्क्रोशंती क्रोशतोभृशदुःखिता ॥४१॥ साऽसकृत्स्नेहगुणिता दी-

नाचित्ताऽजमायया ॥ स्वयं चाबद्धचत शि-
चा बद्धान्पश्यंत्यपस्मृतिः॥ ४२॥ कपोतश्चा
त्मजान्बद्धानात्मनोप्यधिकान्प्रियान् ॥ भार्यां
चात्मसमां दीनोविललापातिदुःखितः॥ ४३
॥ अहो मेपश्यतापायमल्पपुण्यस्य दुर्मतेः
॥ अतृप्तस्याकृतार्थस्य गृहस्त्रैवर्गिको हतः॥
४४॥ अनुरूपा नुकूला च यस्य मे पतिदेव-
ता ॥ शून्ये गृहे मां संत्यज्य पुत्रैः स्वर्याति
साधुभिः ॥ ४५ ॥ सोहं शून्ये गृहे दीनोमृ-
तदारोमृतप्रजः ॥ जिजीविषे किमर्थं वा वि-
धुरोदुःखजीवितः।४६।तांस्तथैवावृतान् शि-
ग्भिमृत्युग्रस्तान्विचेष्टतः ॥ स्वयं च कृपणः
शिक्षु पश्यन्नप्यबुधोऽपतत् ॥ ४७ ॥ तं ल-
ब्ध्वा लुब्धकः क्रूरः कपोतं गृहमेधिनम् ॥

कपोतकान्कपोतीं च सिद्धार्थः प्रययौ गृहम् ॥४८॥ एवं कुटुंब्यशांतात्मा द्वंद्वारामः पतत्रिवत् ॥ पुष्णन्कुटुंबं कृपणः सानुबंधोऽवसीदति ॥४९॥ यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् ॥ गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥५०॥ सुखमैंद्रियकं राजन् स्वर्गे नरक एव च ॥ देहिनां यद्यथा दुःखं तस्मान्नेच्छेत तद्बुधः ॥५१॥ ग्रासं सुमृष्टं विरसं महांतं स्तोकमेव वा ॥ यदृच्छयैवापतितं ग्रसेदाजगरोक्रियः ॥५२॥ शयीताहानि भूरीणि निराहारोऽनुपक्रमः ॥ यदि नोपनमेद्ग्रासोमहाहिरिव दिष्टभुक् ॥५३॥ ओजःसहोबलयुतं बिभ्रद्देहमकर्मकम् ॥ शयानोवीतनिद्रश्च नेहेतेंद्रियवानपि ॥ ५४॥ मुनिःप्रस-

न्नगंभीरोदुर्विगाह्योदुरत्ययः ॥ अनंतपारो-ह्यक्षोभ्यः स्तिमितोदइवार्णवः ॥५५॥ समृ-द्धकामो हीनो वा नारायणपरो मुनिः॥ नोत्स पेंत न शुष्येत सरिद्भिरिव सागरः ॥ ५६ ॥ दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेंद्रियः ॥ प्रलोभितः पतत्यंधे तमस्यग्नौ पतंगवत् ॥ ५७ ॥ योषिद्धिरण्याभरणांबरादिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्युपभो-गबुद्ध्या पतंगवन्नश्यति नष्टदृष्टिः ॥ ५८ ॥ स्तोकं स्तोकं ग्रसेद्ग्रासं देहो वर्तेत यावता॥ गृहानहिंसन्नातिष्ठेद्वृत्तिं माधुकरीं मुनिः ॥५९॥ अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुश-लो नरः ॥ सर्वतः सारमादद्यात्पुष्पेभ्य इव षट्पदः ॥ ६० ॥ सायंतनं श्वस्तनं वा न

संगृह्णीतभिक्षितम्॥पाणिपात्रोदरामत्रोमक्षिकेव न संग्रही॥६१॥सायंतनं श्वस्तनं वा न संगृह्णीत भिक्षुकः॥ मक्षिका इव संगृह्णन् सह तेन विनश्यति ॥ ६२ ॥ पदापि युवतीं भिक्षुर्नस्पृशेद्दारवीमपि ॥ स्पृशन् करीव बध्येत करिण्या अंगसंगतः ॥ ६३ ॥ नाधिगच्छेत्स्त्रियं प्राज्ञः कर्हिचिन्मृत्युमात्मनः ॥ बलाधिकैः स हन्येत गजैरन्यैर्गजो यथा ॥६४॥ नदेयं नोपभोग्यं च लुब्धैर्यद्दुःखसंचितम् ॥ भुंक्ते तदपि तच्चान्यो मधुहेवार्थविन्मधु ॥ ६५ ॥ सुदुःखोपार्जितैर्वित्तैराशासानां गृहाशिषः ॥ मधुहेवाग्रतो भुंक्ते यतिर्वैगृहमेधिनाम् ॥ ६६ ॥ ग्राम्यगीतं न शृणुयाद्यतिर्वनचरः क्वचित् ॥ शिक्षेत हरि

णाद्बद्धान्मृगयोर्गीतमोहितात् ॥ ६७ ॥ नृत्य वादित्रगीतानि जुषन् ग्राम्याणि योषिताम् ॥ आसां क्रीडनकोवश्यऋष्यशृंगो मृगीसु तः॥६८॥ जिह्वयाऽतिप्रमाथिन्या जनो रस-विमोहितः ॥ मृत्युमृच्छत्यसद्बुद्धिर्मीनस्तु बडिशैर्यथा॥६९॥ इंद्रियाणि जयंत्याशु निराहारा मनीषिणः ॥ वर्जयित्वा तु रसनं तन्निरन्नस्य वर्धते ॥ ७० ॥ तावज्जितेंद्रियो न स्याद्विजितान्येंद्रियः पुमान् ॥ न जयेद्रसनं यावज्जितं सर्वं जिते रसे ॥ ७१ ॥ पिंगला नाम वेश्यासीद्विदेहनगरे पुरा ॥ तस्या मे शिक्षितं किंचिन्निबोध नृपनंदन ॥७२॥ सा स्वैरिण्येकदा कांतं संकेतमुपनेष्यती ॥ अभूत्काले बहिर्द्वारि बिभ्रती रूप

मुत्तमम् ॥७३॥ मार्ग आगच्छतो वीक्ष्य पु-
रुषान्पुरुषर्षभ ॥ तान् शुल्कदान्वित्तवतः
कांतान्मेनेऽर्थकामुका॥७४॥आगतेष्वपया-
तेषु सा संकेतोपजीविनी ॥ अप्यन्यो वित्त-
वान् कोपि मामुपैष्यति भूरिदः॥ ७५ ॥ ए-
वं दुराशया ध्वस्तनिद्रा द्वार्यवलंबिनी ॥
निर्गच्छंती प्रविशती निशीथं समपद्यत
॥७६॥तस्या वित्ताशया शुष्यद्वक्त्राया दीन-
चेतसः॥ निर्वेदः परमो जज्ञे चिंताहेतुः सु-
खावहः॥७७॥ तस्या निर्विण्णचित्ताया गीतं
शृणु यथा मम॥ निर्वेद आशापाशानां पु-
रुषस्य यथा ह्यसिः ॥ नह्यंगाजातनिर्वेदो-
देहबंधं जिहासति ॥ ७८ ॥ ॥पिंगलोवाच
॥ ॥ अहो मे मोहवितति पश्यताविजिता

त्मनः ॥ या कांतादसतः कामं कामये येन बालिशा ॥७९॥ संतं समीपे रमणे रतिप्रदं वित्तप्रदं नित्यमिमं विहाय ॥ अकामदं दुःखभयादिशोकमोहप्रदं तुच्छमहं भजेऽज्ञा ॥८०॥ अहो मयात्मा परितापितो वृथा सांकेत्यवृत्त्याऽतिविगर्ह्यवार्तया ॥ स्त्रैणान्नरादर्थतृषोऽनुशोच्यात्क्रीतेन वित्तं रतिमात्मनेच्छती ॥८१॥ यदस्थिभिर्निर्मितवंशवंश्यस्थूणं त्वचा रोमनखैः पिनद्धम् ॥ क्षरन्नवद्वारमगारमेतद्विण्मूत्रपूर्णं मदुपैति कान्या ॥ ८२ ॥ विदेहानां पुरेह्यस्मिन्नहमेकैव मूढधीः ॥ याऽन्यमिच्छंत्यसत्यस्मादात्मदात्काममच्युतात् ॥८३॥ सुहृत्प्रेष्ठतमो नाथ आत्मा चायं शरीरिणाम् ॥तं विक्री-

यात्मनैवाहं रेमेऽनेन यथा रमा ॥ ८४ ॥ कियत्प्रियं ते व्यभजन् कामा ये कामदा-नराः ॥ आद्यंतवंतो भार्यायादेवा वा काल-विद्रुताः ॥ ८५ ॥ नूनं मे भगवान् प्रीतो वि-ष्णुः केनापि कर्मणा ॥ निर्वेदोयं दुराशाया यन्मे जातः सुखावहः ॥ ८६ ॥ मैवं स्युर्म-दभाग्यायाः क्लेशा निर्वेदहेतवः ॥ येनानुबंधं निर्हृत्य पुरुषः शममृच्छति ॥ ८७ ॥ तेनो-पकृतमादाय शिरसा ग्राम्यसंगता ॥ त्य-क्त्वा दुराशाः शरणं व्रजामि तमधीश्वरम् ॥ ८८ ॥ संतुष्टा श्रद्दधत्येतद्यथालाभेन जी-वती ॥ विहराम्यमुनैवाहमात्मना रमणेन वै ॥ ८९ ॥ संसारकूपे पतितं विषयैर्मुषितेक्ष-णं ॥ ग्रस्तं कालाहिनात्मानं कोन्यस्त्रातुम-

धीश्वरः ॥ ९० ॥ आत्मैव ह्यात्मनो गोप्ता नि-
र्विद्येत यदा ऽखिलात् ॥ अप्रमत्त इदं पश्ये-
द्ग्रस्तं कालाहिना जगत् ॥ ९१ ॥ ॥ ब्राह्मण
उवाच ॥ ॥ एवं व्यवसितमतिर्दुराशां कांत
तर्षजाम् ॥ छित्वोपशममास्थाय शय्यामु-
पविवेश सा ॥ ९२ ॥ आशा हि परमं दुःखं
नैराश्यं परमं सुखम् ॥ यथा संछिद्य कां-
ताशां सुखं सुष्वाप पिंगला ॥ ९३ ॥ ॥ ब्रा-
ह्मण उवाच ॥ ॥ परिग्रहोहि दुःखाय य-
द्यत्प्रियतमं नृणाम् ॥ अनंतं सुखमाप्नोति
तद्विद्वान्यस्त्वकिंचनः ॥ ९४ ॥ सामिषं कुररं
जघ्नुर्बलिनो ये निरामिषाः ॥ तदामिषं परि-
त्यज्य स सुखं समविंदत ॥ ९५ ॥ न ते माना-
वमानौ स्तो न चिंता गेहपुत्रिणाम् ॥ आत्म-

क्रीडआत्मरतिर्विचरामीहबालवत् ॥ ९६ ॥
द्वावेव चिंतया मुक्तौ परमानंद आप्लुतौ ॥
यो विमुग्धो जडो बालो यो गुणेभ्यः प-
रंगतः ॥९७॥ क्वचित्कुमारी त्वात्मानं वृणा-
नान् गृहमागतान् ॥ स्वयं तानर्हयामास
क्वापि यातेषु बंधुषु ॥९८॥ तेषामभ्यवहा-
र्यं शालीन् रहसि पार्थिव ॥ अवघ्नंत्याः प्र-
कोष्ठस्थाश्चक्रुः शंखाः स्वनं महत् ॥९९॥ सा
तज्जुगुप्सितं मत्वा महती व्रीडिता ततः ॥
बभंजैकैकशः शंखान् द्वौद्वौ पाण्योरशेषयत्
॥१००॥ उभयोरप्यभूद्घोषो ह्यवघ्नंत्याः स्म
शंखयोः ॥ तत्राप्येकं निरभिददेकस्मान्नाभव-
द्ध्वनिः ॥१०१॥ अन्वशिक्षमिमं तस्या उपदे-
शमरिंदम ॥ लोकाननुचरन्नेताँल्लोकतत्त्ववि-

वित्सया॥१०२॥वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि॥एक एव चरेत्तस्मात्कुमार्या इव कंकणः॥१०३॥मन एकत्र संयुज्याज्जितश्वासो जितासनः॥वैराग्याभ्यासयोगेन ध्रियमाणमतंद्रितः॥१०४॥यस्मिन्मनोलब्धपदं यदेतच्छनैः शनैर्मुंचति कर्मरेणून्॥ सत्वेन वृद्धेन रजस्तमश्च विधूय निर्वाणमुपैत्यनिंधनम्॥१०५॥तदैवमात्मन्यवरुद्धचित्तो न वेद किंचिद्बहिरंतरं वा॥यथेषुकारोनृपतिं व्रजंतमिषौ गतात्मा न ददर्श पार्श्वे॥१०६॥एकचार्यनिकेतः स्यादप्रमत्तो गुहाशयः॥अलक्ष्यमाण आचारैर्मुनिरेकोल्पभाषणः १०७॥ गृहारंभोतिदुःखाय विफलश्चाध्रुवात्मनः॥ सर्पः परकृतं वेश्म प्रविश्य सुखमेधते

॥१०८॥ एको नारायणो देवः पूर्वसृष्टं स्वमायया ॥ संहृत्य कालकलया कल्पांत इदमीश्वरः ॥१०९॥ एकएवाद्वितीयोभूदात्माधारोखिलाश्रयः ॥ कालेनात्मानुभावेन साम्यं नीतासु शक्तिषु ॥ सत्वादिष्वादिपुरुषः प्रधानपुरुषेश्वरः॥११०॥परावराणां परम आस्ते कैवल्यसंज्ञितः॥ केवलानुभवानंदसंदोहोनिरुपाधिकः॥१११॥केवलात्मानुभावेन स्वमायां त्रिगुणात्मिकाम्॥ संक्षोभयन्सृजत्यादौतथा सूत्रमरिंदम ॥११२॥ तामाहुस्त्रिगुणव्यक्तिं सृजंतीं विश्वतोमुखम् ॥ यस्मिन्प्रोतमिदं विश्वं येन संसरते पुमान्॥११३॥ यथोर्णनाभिर्हृदयादूर्णां संतत्य वक्त्रतः ॥ तया विहृत्य भूयस्तांग्रसत्येवं महेश्वरः ॥ ११४ ॥

यत्रयत्र मनो देही धारयेत्सकल धिया ॥ स्नेहाद्वेषाद्भयाद्वापि याति तत्तत्सरूपताम् ॥ ११५ ॥ कीटः पेशस्कृतं ध्यायन्कुड्यां तेन प्रवेशितः ॥ याति तत्साम्यतां राजन् पूर्वरूपमसंत्यजन् ॥११६ ॥ एवं गुरुभ्य एतेभ्य एषा मे शिक्षिता मतिः॥ स्वात्मोपशिक्षितां बुद्धिं शृणु मे वदतः प्रभो ॥११७॥ देहोगुरुर्मम विरक्तिविवेकहेतुर्बिभ्रत्स्म सत्त्वनिधनं सततार्त्युदर्कम् ॥ तत्त्वान्यनेन विमृशामि यथा तथापि पारक्यमित्यवसितो विचराम्यसंगः॥११८॥जायात्मजार्थपशुभृत्यगृहाप्तवर्गान्पुष्णाति यत्प्रियचिकीरषया वितन्वन् ॥ स्वांते सकृच्छमवरुद्धधनः सदेहः सृष्ट्वस्य बीजमवसीयते

ति वृक्षधर्मः ॥११९॥ जिह्वैकतोऽमुमपकर्ष-
ति कर्हि तर्षा शिश्नोन्यतस्त्वगुदरं श्रवणं
कुतश्चित् ॥ घ्राणोन्यतश्चपलदृक् क्व च कर्म
शक्तिर्वल्ह्यः सपत्न्य इव गेहपतिं लुनंति
॥१२० ॥ सृष्ट्वा पुराणि विविधान्यजयात्म
शक्त्या वृक्षान्सरीसृपपशून्खगदंशमत्स्यान्॥
तैस्तैरतुष्टहृदयः पुरुषं विधाय ब्रह्मावलो
कधिषणं मुदमाप देवः ॥१२१॥ लब्ध्वा सु-
दुर्लभमिदं बहुसंभवांते मानुष्यमर्थदमानि-
त्यमपीह धीरः ॥ तूर्णं यतेत न पतेदनुमृत्यु
यावन्निःश्रेयसाय विषयः खलु सर्वतः स्या-
त् ॥१२२॥ एवं संजा[illegible]वैराग्यो विज्ञानालो
क अत्मिान ॥ विचरा[illegible]
[illegible]हंकृतिः ॥१२३॥

स्थिरं स्यात्सुपुष्कलम् ॥ ब्रह्मैतदद्वितीयं वै गीयते बहुधर्षिभिः ॥१२४॥ श्रीभगवानुवाच ॥ ॥ इत्युक्त्वा स यदुं विप्रस्तमामंत्र्य गभीरधीः ॥ वंदितोऽभ्यर्थितो राज्ञा ययौ प्रीतो यथागतम् ॥१२५॥ अवधूतवचः श्रुत्वा पूर्वेषां नः सपूर्वजः ॥ सर्वसंगविनिर्मुक्तः समचित्तो बभूव ह ॥१२६॥ इति श्रीमद्भागवते महापुराणे एकादशस्कंधे अवधूतगीतं समाप्तम् ॥ ॥ श्रीकृष्णार्पणमस्तु ॥७॥ श्रीगणेशायनमः ॥ जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ॥ राजा जयति सुग्रीवो राघवेणाभिपालितः ॥१॥ दासोहं कोसलेंद्रस्य रामस्याक्लिष्टकर्मणः ॥ हनुमान् शत्रुसैन्यानां निहंता मारुतात्मजः ॥२॥ न रावणस्तेन